ततः सर्व्वे गणास्तत्र भुञ्जन्ते पललान्यपि ।
हते वराहस्य गणे भर्गमासाद्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वमभवत्तेषां चतुर्भागवतां तदा ।
वचनात् पद्मजातस्य भूतग्रामास्ततो मताः ॥
यो लोकविदितः पूर्व्वं भूतग्रामश्चतुर्व्विधः ।
यतस्तेभ्योऽधिका यत्नैस्तद्वड्ढग्राम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः शम्भुगणा यथा ।
यदाहारा यदाकारा यत्कृत्यास्ते महौजसः ॥
य इदं शृणुयान्नित्यमाख्यानं योगमुत्तमम् ।
स दीर्घायुः सदोत्साही योगयुक्तश्च जायते ॥"
इति कालिकापुराणे पारिषदोत्पत्तिर्नाम २६ अध्यायः ॥ (धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते । १ । ११७ । १२ ।
"प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान् ॥")

प्रमथनं, क्ली, (प्र+मथ+भावे ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११५ ॥ (यथा, रामायणे । १ । ३ । २४ ।
"वालिप्रमथनञ्चैव सुग्रीवप्रतिपादनम् ॥"
क्षोभनम् । विलोड़नम् । इति मथधात्वर्थदर्शनात् ॥ (प्रकर्षेण मथतीति । प्र+मथ्+ल्युः । प्रमाथके, त्रि । यथा, महाभारते । १।१०२।६२।
"स चाश्विरूपसदृशो देवतुल्यपराक्रमः ।
सर्व्वासामेव नारीणां चित्तप्रमथनो रहः ॥")

प्रमथा, स्त्री, (प्रमथति त्रिदोषानिति । प्र+मथ् +अच् ।) हरीतकी । इति मेदिनी । थे,२१ ॥ (गुणादिकमस्य हरीतकीशब्दे ज्ञातव्यम् ॥)

प्रमथाधिपः, पुं, (प्रमथानां अधिपः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥

प्रमथितं, क्ली, (प्रकर्षेण मथितम् ।) निर्जलतक्रम् । इति राजनिर्घण्टः ॥

प्रमदः, पुं, (प्र+मद्+"प्रमदसंमदौ हर्षे ।" ३ । ३ । ६८ । इति अप् ।) हर्षः । इत्यमरः । १।४।२४ ॥ (यथा, कथासरित्सागरे । ६।१६२ ।
"तच्छ्रुत्वा मम राज्ञश्च विषादप्रमदौ द्वयोः ।
अभूतां मेघमालोक्य हंसचातकयोरिव ॥"
प्रमाद्यत्यनेनेति । प्र+मद्+करणे अप् ।) धुस्तूरफलम् । इति शब्दचन्द्रिका ॥ (दानवविशेषः । यथा, हरिवंशे । ३ । ८७ ।
"प्रमदो मयः कुपथो हयग्रीवश्च वीर्य्यवान् ॥"
वशिष्ठतनयानामन्यतमः । स तु उत्तममन्वन्तरे सप्तर्षिप्रभेदः । यथा, भागवते । ८ । १ । २४ ।
"वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥")
प्रमाद्यतीति । प्र+मद्+कर्त्तरि अच् । यद्वा प्रकर्षेण मदोऽस्य ।) मत्ते, त्रि । इति मेदिनी । दे, ७५ ॥ (यथा, रघौ । १६ । ३७ ।
"प्राविषि प्रमदबर्हिणेष्वभूत्
कृत्रिमाद्रिषु विहारविभ्रमः ॥")

प्रमदकाननं क्ली, (प्रमदानां काननम् । "ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् ।" ६ । ३ । ६३ । इति ह्रस्वः । यद्वा, प्रमदाय हर्षाय यत् काननम् ।) प्रमदावनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदवनं, क्ली, (प्रमदानां वनमिति । "ङ्यापोरिति ।" ६ । ३ । ६३ । इति ह्रस्वः ।) राज्ञोऽन्तःपुरोचितवनम् । इत्यमरः । २ । ४ । ७ ॥

प्रमदा, स्त्री, (प्रमदयति पुरुषमिति । प्र+मद हर्षे+णिच्+अच् । यद्वा, प्रमदो हर्षोऽस्त्यस्या इति अच् । टाप् ।) उत्तमयोषित् । इति मेदिनी । दे, ५ ॥ (यथा, कुमारे । ४ । १२ ।
"नयनान्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना ॥")
चतुर्द्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम् ।
"नजभजला गुरुश्च भवति प्रमदा ॥")

प्रमदाकाननं क्ली, (प्रमदानां काननम् ।) प्रमदवनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदावनं, क्ली, (प्रमदानां वनम् ।) प्रमदवनम् । इति शब्दरत्नावली ॥

प्रमनाः, [स्] त्रि, (प्रहृष्टं मनोऽस्य ।) हर्षयुक्तः । इत्यमरः । ३ । १ । ७ ॥ (यथा, महाभारते । ८ । ३७ । ४१ ।
"इति बहुपरुषं प्रभाषति
प्रमनसि मद्रपतौ रिपुस्तवम् ॥")

प्रमयः, पुं, (प्र+मी वधे+भावे अच् ।) वधः । इति हेमचन्द्रः । ३ । ३४ ॥ (यथा, राजतरङ्गिण्याम् । १ । ६ ।
"दृष्टं दृष्टं नृपोदन्तं बद्धा प्रमयमीयुषाम् ।
अर्व्वाक्कालभवैर्वार्त्ता यत्प्रबन्धेषु पूर्य्यते ॥")

प्रमा, स्त्री, (प्रमीयते इति । प्र+माङ् माने +"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) यथार्थज्ञानम् । तत्पर्य्यायः । प्रमितिः २ । इत्यमरः । ३ । २ । १० ॥ प्रमाणम् ३ । इति शब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । २य अङ्के ।
"प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥"
यथा च ऋग्वेदे । १० । १३० । ३ ।
"कासीत्प्रमा प्रतिमा किम् ॥"
"यज्ञस्य प्रमा प्रमाणमियत्ता का कथम्भूतासीत् ।"
इति तद्भाष्ये सायनः ॥) न्यायमते तद्वति तत्प्रकारकज्ञानम् । भ्रमभिन्नज्ञानम् । अस्याः कारणं गुणः । स च प्रत्यक्षे विशेष्ये विशेषणस्य सम्बन्धः । अनुमितौ साध्यविशिष्टपक्षे परामर्शः । शाब्दबोधे योग्यतायाः तात्पर्य्यस्य वा यथार्थज्ञानम् । उपमितौ शक्ये सादृश्यबुद्धिः । यथा,—
"दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ॥
पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ।
शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा ॥
गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ।
अथवा तत्प्रकारं यत् ज्ञानं तद्वद्विशेष्यकम् ॥"
इति भाषापरिच्छेदे । १३१-१३५ ॥
("दोष इति । अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्रापि पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम् । गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम् । यथा प्रमाज्ञानसाधारणकारणभिन्नकारणजन्याजन्यज्ञानत्वात् अप्रमावत् । न च दोषाभाव एव कारणमस्त्विति वाच्यम् । पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वात् । न च गुणसत्त्वेऽपि पित्तप्रतिबन्धात् शङ्खे न श्वैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः । एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च । तत्र दोषाः के इत्याकाङ्क्षायामाह पित्तेति । क्वचित् पीतादिभ्रमे पित्तं दोषः क्वचित् चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः । क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं दोषा भ्रान्तिजनका इत्यर्थः । अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति प्रत्यक्षेत्विति । प्रत्यक्षे विशेषणवत् विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुण इति एवमग्रेऽप्यूह्यः । प्रमां निरूपयति भ्रमभिन्नमिति । ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवेति । तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः । इदन्तु बोध्यम् । येन सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकं तेन सम्बन्धेन प्रकारकत्वं वाच्यम् । तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः ॥" * ॥)

प्रमाणं, क्ली, (प्रमीयते विश्वमनेनेति । प्र+मा+ल्युट् ।) विष्णुः । यथा,—
"प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ॥"
इति महाभारते शान्तिपर्व्वणि दानधर्म्मः ॥
नित्यम् । मर्य्यादा । शास्त्रम् । (यथा,—
"आप्ता ह्यवितर्कस्मृतिविभागविदो निष्प्रीत्युपतापदर्शिनश्च । तेषामेवङ्गुणयोगात् यद्वचनं तत् प्रमाणम् । अप्रमाणं पुनर्मत्तोन्मत्तमूर्खरक्तदुष्टादुष्टवचनमिति ।" इति चरके विमानस्थाने चतुर्थेऽध्याये ॥) सत्यवादी । (प्र+मा+भावे ल्युट् ।) इयत्ता । हेतुः । (प्रमिणोतीति । प्र+मा+कर्त्तरि ल्युः ।) प्रमाता । इति मेदिनी । णे, ६९ ॥ प्रमा ।